हरगायां स्थितैर्विप्रा। गोगजाश्वादिशालाश्च तत्पुरीषस्य निर्गमम्। अस्तं याते न कुर्वीत देवदेवे दिवाकरे। अधिकमश्वशालाशब्दे ५२४ पृ० अश्वशब्दे च दृश्यम्।

**हयशीर्ष** पु० हयस्येव शीर्षमस्य। १विष्णुमूर्त्तिभेदे हयशीर्षपञ्चरात्रे तत्पूजादिकं दृश्यम्। २शालग्राममूर्त्तिभेदे शालग्रामशब्दे ६००१ पृ० दृश्यम्।

**हया** स्त्री हयः हयगन्धोऽस्त्यस्याः अच्। अश्वगन्धायाम् राजनि०। घोटक्यां तु हयीत्येव।

**हयाध्यक्ष** पु० हयेषु तद्रक्षणेषु अध्यक्षः। अश्वरक्षणाधिकृते

**हयानन्द** पु० हयमानन्दयति आ+नन्द-णिच्-अण्। मुद्गे राजनि०।

**हयारि** पु० ६त०। करवीरे रत्नमा०।

**हयाशना** स्त्री हयैरश्यते अश-ल्युट्। शल्लकीवृक्षे शब्दच०

**हयोत्तम** पु० हयेषु उत्तमः। अश्वरत्ने आजानेयेऽश्वे त्रिका०

**हर** पु० हृ-अच्। १रुद्रे अमरः २अग्नौ ३गर्दभे ४विभाजके च "अन्योन्यहाराभिहतौ हरांशाविति" लीला०। हृ-भावे अप्। ५हरणे ६विभाजने च।

**हरगौरी** स्त्री हरदेहार्द्धहरा गौरी शा०त०। अर्द्धनारीश्वररूपे १शिवपार्वत्योर्मूर्त्तिभेदे तल्लक्षणम्। १७०१ पृ० दृश्यम्। द्वन्द्व०। २शिवपार्वत्योः द्वि० व०।

**हरचूडामणि** पु० हरस्य चूडामणिरिव। चन्द्रे।

**हरण** न० हृ-भावे ल्युट्। १स्थानान्तरकरणे २विभाजने च कर्मणि ल्युट्। ३यौतुकादौ देये धने भा० आ० हरणाहरणपर्व २२१अ०। ४भुजे मेदि०।

**हरतेजस्** न० ६त०। १पारदे राजनि० २शिववीर्य्ये च। हरबीजादयोऽप्यत्र। [गङ्गायां हेमच०।

**हरशेखरा** स्त्री हरस्य शेखरमाशयत्वेनास्त्यस्याः अच्।

**हरि** पु० हृ-इन्। १विष्णौ २सिंहे ३सर्पे ४वानरे ५भेके ६शुकखगे अमरः। ७चन्द्रे ८सूर्य्ये ९वायौ १०अश्वे ११यमे १२हरे १३ब्रह्मणि १४किरणे जम्बुद्वीपस्य १५वर्षभेदे १६इन्द्रे च मेदि० १७मयूरे १८कोकिले १९हंसे २०अग्नौ शब्दर०। भर्तृहरिनामके वाक्यप्रदीयग्रन्थकारके २१पण्डिते त्रिका०। २२पिङ्गलवर्णे २३हरिद्वर्णे हेमच० २४तद्वति त्रि०। "हरिं विदित्वा हरिभिश्च वाजिभिः" रघु०। २५पीते अनेकार्थको०।

**हरिक** पु० हरि+संज्ञायां कन्। पीतहरिद्वर्णाश्वे हेमच०

**हरिकेलीय** पु० हरिकेलिमर्हति छ। वङ्गदेशे हेमच०।

**हरिकेश** पु० हरिः पिङ्गलः केशोऽस्य। १शिवे २शिवभक्तयक्षभेदे च। स एव तत्प्रसादात् काश्यां दण्डपाणित्वमाप्तवान् इति काशीखण्डे ३२अ० स्थितम्। मत्स्यपु० १५८अ० दृश्यम्। [याम् अपराजितायां राजनि०।

**हरिक्रान्ता** स्त्री हरिस्तद्वर्णः क्रान्तो येन। विष्णुक्रान्ता-

**हरिगृह** न०६त०. हरेर्विष्णुमूर्त्तेर्गृहम्। १हरिमूर्त्तिगृहे २एकचक्रपुरीभेदे च त्रिका०।

**हरिचन्दन** न० हरेरिन्द्रस्य प्रियं चन्दनम् चन्दयति चदि-ल्यु ६त० वा। १देवतरुभेदे अमरः। हरेर्विष्णोः प्रियं चन्दनम्। २श्वेतचन्दने ३गोशीर्षनामके मलयैकदेशजाते चन्दनभेदे ४ज्योत्स्नायां ५कुङ्कुमे मेदि०। ६पद्मकेशरे हारा०। ७चन्द्राङ्के च न०शब्दर०। "हरिचन्दनन्तु दिव्यं हिमं तदिह दुर्लभं मनुजैः। पित्ताटोपविलोपिश्रमधूमनशोषमान्द्यभेदं हृत्" राजनि०। "दृष्ट च तुलसीकाष्ठं कर्पूरागुरुयोगतः। अथ वा केशरैर्योज्यं हरिचन्दनमुच्यते" पद्मपु० पा०ख० १२अ० उक्ते द्रव्यसंयुक्तद्रव्यगणे च।

**हरिण** पुंस्त्री० हृ-इनन्। स्वनामख्याते १पशौ अमरः स्त्रियां ङीष्। २शिवे ३विष्णौ ४हंसे ५शुक्लवर्णे ६पाण्डुवर्णे च। ७तद्वति त्रि०अमरः। "हरिणः शीतलो बद्धविण्मूत्रो दीपनो लघुः। रसे पाके च मधुरः सुगन्धः सन्निपातहा" राजव० तन्मांसगुणाः। "हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव!। ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा। एते बलिप्रदानेषु चर्मदाने च कीर्त्तिताः" कालिकापु० ६६अ०। [शब्दर०।

**हरिणनर्त्तक** पु० हरिण इव नृत्यति नृत-ण्वुल्। किन्नरे

**हरिणहृदय** पु०हरिणस्येव भीतं हृदयमस्य। भीरौ शब्दर०

**हरिणाक्षी** स्त्री हरिणस्येवाक्षि यस्याः ५त० ६त० वा षच्स०। ङीष्। १हट्टविलासिनीनामगन्धद्रव्ये शब्दच०। २हरिणतुल्यनेत्रयुते त्रि०स्त्रियां ङीष्। "हरिणाक्षि! कटाक्षेण आत्मानमवलोकय" इत्युद्भटः।

**हरिणाङ्क** पु० हरिणः शशनामको मृगोऽङ्कश्चिह्नम् अङ्के क्रोडे वा अस्य। १चन्द्रे शब्दर० २कर्पूरे च।

**हरिणी** स्त्री हरितवर्णा स्त्री ङीप् तस्य नः। १हरितवर्णायां स्त्रियां मेदि० २स्वर्णप्रतिमायाम् अमरः। ३स्वर्णयुथ्यां ४मञ्जिष्ठायां राजनि०। ५तरुण्यां ६वरस्त्रियां शब्दर० "नसमरसलागः षड्वेदैर्हयैर्हरिणी मता" इति वृ० र० उक्तलक्षणके ७सप्तदशाक्षरपादके छन्दोभेदे हरिणस्य स्त्री ङीष्। ८मृग्यां च ९अप्सरोभेदे।